D.A.V. PUBLIC SCHOOL, THANE
SESSION: 2022 - 2023
PERIODIC TEST – III (SET-B)
SUBJECT: SANSKRIT

Std.: VIII **Max Marks :40**
Date: 26/12/2022 **Time: 01.30HRS.**

सामान्य निर्देशा:-

1. सम्पूर्णे प्रश्नपत्रे चत्वार: भागा: सन्ति।

2. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

3. उत्तरलेखनात् पूर्वं प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।

4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

5. प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

खण्ड क - (अपठित-अवबोधनम्) (5 अङ्का:)

एक: अतिदुष्ट: वानर: आसीत्। स: प्रतिदिनं यथाशक्ति: वृक्षे स्थितान् खगान् पीडयति स्म। खगानां नीडस्य समीपं गत्वा तेषां परिश्रमस्य उपहासं करोति स्म। एक: खग: अवदत् - भो वानर ! किमर्थमं उपहासं करोषि? वर्षाकाले नीडम् एव अस्मान् रक्षति। वयं परिश्रमं कृत्वा विघ्नं विना जीवाम: च। वानर: अट्टाहासेन अवदत् - भो मूर्खा:! अरे ! योगिनां गृहं न भवति। इति कथयित्वा वानर: खगानां नीडानि भग्नानि अकरोत्। तत् दृष्ट्वा एका चटका अवदत् - त्वं किमर्थम् एवं करोषि ? सज्जना: कदापि अन्यजनान् न पीडयन्ति। त्वं तु निर्लज्ज: मूर्ख: च असि। संसारे परिश्रमस्य एव महत्त्वं भवति न तु पीडनस्य। अत: सर्वै: सह मिलित्वा स्नेहेन च वसेत्।

अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(½x2=1)**

1) वानर: केषां नीडानि भग्नानि अकरोत्?

2) के कदापि अन्यजनान् न पीडयन्ति।?

3) क: निर्लज्ज: मूर्ख: च अस्ति?

आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) वानर: खगानां नीडस्य समीपं गत्वा किं करोति?

2) संसारे कस्य महत्त्वं भवति कस्य च न भवति ?

3) वानर: अट्टाहासेन किम् अवदत्?

इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत - **(1)**

ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) **(½x2=1)**

1) 'एक: अतिदुष्ट: वानर: आसीत्।' अस्मिन् वाक्ये **अतिदुष्ट:** इति पदस्य विशेष्यपदं किम् अस्ति?

(क) वानर: (ख) एक: (ग) आसीत्

2) **'करोषि'** इति क्रियापदस्य कर्तृपदं गद्यांशे किम् प्रयुक्तम् ?

(क) एवं (ख) त्वं (ग) किमर्थम्

3) **'प्रशंसाम्'** इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) मूर्ख: (ख) निर्लज्ज (ग) उपहासं

खण्ड - ख (रचनात्मक-कार्यम्) (5 अङ्का:)

प्रश्न: 2. अधोलिखितानि वाक्यनि संस्कृतभाषया अनुवादं कृत्वा लिखत - (केवलं पञ्चवाक्यानि) **(1x5=5)**

1) माला पानी पी रही है।

2) मैंने शेर को देखा।

3) तुम सब कहाँ जाओगे?

4) माता मन्दिर के बाहर है।

5) बालिकापढ़ने के लिए बैठती है ।

6) तुम फल खाओ।(एकवचन)

7) हम सब खेलकर घर आते हैं।

खण्ड - ग (अनुप्रयुक्त-व्याकरणम्) (12 अङ्का:)

प्रश्न: 3. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

1) **जल + ओघ:** तीव्र: अस्ति।

2) छात्रा: श्लोकस्य **अन्वयं** लिखन्ति।

3) अहं मित्रस्य **पितृ + उपदेशं** श्रृणोमि।

4) प्राय: जनेषु **मतैक्यम्** न भवति।

5) सुरेश: **इति+अस्य** बालस्य नाम अस्ति।

6) यदा श्यामा आगच्छति **तदैव** अहं पठामि।

प्रश्न: 4. अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) सज्जन: ..... न विश्वसिति। क) दुष्टजने ख) दुष्टजनेन ग) दुष्टजनात्

2) राजेश: ..... पृथक् उपविशति। क) निधिम् ख) निधे: ग) निध्यै

3) त्वं ..... निपुणा असि। क) गायनात् ख) गायनस्य ग) गायने

प्रश्न: 5. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) हनुमान् **रामस्य** पृष्ठत: चलति।

2) छात्रा: **विद्यालयात्** बहि: न गच्छन्ति।

3) **भारतस्य** अध: श्रीलंका अस्ति।

प्रश्न: 6. अधोलिखितवाक्येषु अङ्कानां स्थाने उपयुक्तं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्य: चित्वा लिखत - **(1x4=4)**

1) .....(67) छात्रा: भ्रमणाय गच्छन्ति।

क) सप्तषष्टि: ख) षड्सप्तति: ग) सप्तनवति:

2) वृक्षे ..... (85) खगा: निवासं कुर्वन्ति।

क) अष्टपञ्चाशत् ख) पञ्चाशीति: ग) सप्तसप्तति:

3) मम समीपे .....(99) रुप्यकाणि सन्ति।

क) नवनवति: ख) षण्णवति: ग) एकनवति:

4) वने .....(72) गजा: सन्ति।

क) सप्तविंशति: ख) द्वाविंशति: ग) द्विसप्तति:

खण्ड घ - पठित-अवबोधनम् (18 अङ्का:)

प्रश्न: 7. अधोदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - **(4)**

किञ्चित् कालात् अनन्तरं सः एव नागरिकः महात्मानं पुनः भोजनाय निमन्त्रितवान् | महात्मा यथासमयं तस्य गृहं गतवान् परन्तु सः नागरिकः गृहे कस्मिंश्चित् कार्ये संलग्नः आसीत् | अतिथेः आगमनस्य सूचनां प्राप्य अपि सः बहिः न आगतः | किञ्चित् कालं प्रतीक्षां कृत्वा महात्मा स्वकुटीरम् आगच्छत् | सः पुनः रात्रौ बुभुक्षितः अतिष्ठत् | मासानन्तरम् एकवारं पुनः सः एव पुरुषः महात्मानं गृहम् आगन्तुम् अकथयत् | महात्मा सहजरूपेण तस्य निमन्त्रणं स्वीकृतवान् | एतत् दृष्ट्वा सः पुरुषः महात्मनः चरणयोः अपतत् अश्रुणि प्रवाहमाणः च न्यवेदयत् -"महात्मन् ! मया द्विवारं भवतः अपमानः कृतः परं भवान् किमपि न अकथयत् | पुनः मम निवेदनः स्वीकृतवान् | मया अपराधः कृतः | कृपया मां दण्डयतु " |

क) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(½x2=1)**

1) क: बहि: न आगत: ?
3) सः पुरुषः कुत्र अपतत्?
2) महात्मा सहजरूपेण किं स्वीकृतवान्?

ख) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) किञ्चित् कालं प्रतीक्षां कृत्वा महात्मा कुत्र आगच्छत्?
3) सः नागरिकः कुत्र संलग्नः आसीत्?
2) पुरुष: अश्रूणि प्रवाहमान: महात्मानं किं न्यवेदयत् ?

ग) निर्देशानुसारम् उत्तरत - **(½x2=1)**

1) '**खादित्वा**' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
2) '**तं श्रृगालं**' अनयो: पदयो: विशेष्यपदं किम् अस्ति?

प्रश्न: 8. अधोदत्तं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - **(4)**

"पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः |
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ||"

क) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(½x2=1)**

1) के फलानि न खादन्ति ?
3) के सस्यं न अदन्ति?
2) सतां विभूतय: किमर्थं भवन्ति?

ख) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) का: स्वयमेव अम्भ: न पिबन्ति ?
3) परोपकाराय सतां किं भवति?
2) वारिवाहा: खलु किं न अदन्ति ?

ग) निर्देशानुसारम् उत्तरत - **(½x2=1)**

1) '**स्वयं न खादन्ति फलानि वृक्षाः**' अस्मिन् वाक्ये **खादन्ति** इति क्रियापदस्य कर्तृपदं किम् अस्ति?
2) '**जलम्**' इति पदस्य किं पर्यायपदं पद्यांशे प्रयुक्तम् अस्ति?

प्रश्न: 9. मञ्जूषात: उचितपदानि चित्वा अधोदत्तं पूर्णं अन्वयं लिखत - **(½x4=2)**

"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः |
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ||"

अन्वयः - आत्मनः .....1..... इदं त्रिविधं .....2.....द्वारम् (अस्ति)- कामः .....3.....तथा लोभः |
तस्मात् एतत् त्रयं .....4.....|

मञ्जूषा - त्यजेत्, नरकस्य, आत्मनः, क्रोधः ।

प्रश्न: 10. मञ्जूषात: उचितपदानि चित्वा अधोदत्तं सम्पूर्णं भावार्थं लिखत - (½x4=2)

- **आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः |**

भावार्थ :- अस्माकं शत्रुः अस्माकं .....1..... एव अस्ति | एषः शत्रुः कः ? आलस्यम् |
.....2..... एव वस्तुतः .....3..... शत्रुः अस्ति | अतः आलस्यं .....4..... कुरुत |

मञ्जूषा - आलस्यम्, मा, शरीरे, अस्माकम् ।

प्रश्न: 11. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्) (4)

1) मूषकराज: **<u>शृगालं</u>** कथयति ।
2) क्रोध: **<u>मनुष्यस्य</u>** नाशं करोति ।
3) **<u>शृगाल:</u>** भोजनाय भ्रमति स्म।
4) **<u>महात्मा</u>** यथासमयं तस्य गृहं गतवान्।
5) **<u>जना:</u>** विद्यया नम्रतां प्राप्नुवन्ति ।

प्रश्न: 12. उचितपदै: मेलनं कुरुत - (½x4=2)

1) बुद्धि:
2) चकिता:
3) काम:
4) नत्वा

मञ्जूषा - विस्मिता:, इच्छा, प्रणम्य, मति: ।

---------- इति ----------